वाला होवे तिस प्रकार सविता देवता तुझ पर अनुग्रह करें। यह अस्तृत मणि तेरी रक्षा करे ॥ ७ ॥

उन्नीसवें काण्डके छठे अनुवाकमें प्रथम सूक्त समाप्त (५९०)

"आ रात्रि पार्थिवम्" इति सूक्तद्वयम् अर्थसूक्तम्। "इषिरा योषा" इति सूक्तद्वयमपि अर्थसूक्तम्। अस्य सूक्तद्वययुगलस्य रात्रीकल्पे रात्र्युपस्थाने जपे च विनियोगः। "अथ पिष्टमयीं रात्रिं चतुर्भिर्दीपकैः सह" इति [प० ४. ३] प्रक्रम्य उक्तं परिशिष्टे। "आ रात्रि पार्थिवम् इषिरा योषेति सूक्ताभ्याम् अन्वारभ्य जपेत्" इति [प० ४. ४]। "पैष्टीं रात्रिं कृत्वा चतुर्भिर्दीपकैरर्चयित्वा आ रात्रि पार्थिवम् इषिरा योषेति सूक्तद्वयेन रात्रिम् उपस्थाय" इति [प० ४. ५] च। अर्थसूक्तद्वयेनेत्यर्थः ॥

"आ रात्रि पार्थिवम्" ये दो अर्थसूक्त हैं। और "इषिरा योषा" ये दोनों सूक्त भी अर्थसूक्त हैं। इनका रात्रिकल्पके रात्र्युपस्थानमें और जपमें विनियोग होता है। "अथ पिष्टमयीं रात्रिं चतुर्भिर्दीपकैः सह" (परिशिष्ट ४ । ३) का आरंभ करके अथर्वपरिशिष्टमें कहा है, कि—"०आ रात्रि पार्थिवम् इषिरा योषेति सूक्तद्वयेन रात्रिं उपस्थाय" (परिशिष्ट ४ । ५) ॥

तत्र प्रथमा ॥

आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः।
दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः ॥ १ ॥

आ। रात्रि। पार्थिवम्। रजः। पितुः। अप्रायि। धामऽभिः।
दिवः। सदांसि। बृहती। वि। तिष्ठसे। आ। त्वेषम्। वर्तते। तमः ॥ १ ॥

हे रात्रि। ❀ "रात्रेश्चाजसौ" इति ङीप्। संबुद्धौ ह्रस्वः ❀। त्वया पार्थिवम् पृथिवीरूपम्। ❀ प्रज्ञादेराकृतिगणत्वात् पृथिवी-

शब्दात् स्वार्थे अण् प्रत्ययः । व्यत्ययेन आद्युदात्तः ॐ । रजः लोकः । "लोका रजांस्युच्यन्ते" इति यास्कः [नि० ४. १९] । यद्वा पार्थिवम् पृथिव्यां भवम् । ॐ उत्सादित्वाद् अञ् प्रत्ययः । "ञ्नित्यादिर्नित्यम्" इति आद्युदात्तः ॐ । रजः स्थानं पृथिवीसंबन्धिस्थलगिरिनदीसमुद्रादिकम् । पितुः । पितृशब्देन द्युलोकोभिधीयते । "द्यौः पिता पृथिवी माता" इति हि मन्त्रवर्णः [तै० ब्रा० ३. ७. ५. ४] । अत्र तृतीयस्य स्वर्गलोकस्य पृथगभिधानाद् मध्यमभूतान्तरिक्षलोको विवक्षितः । तस्य धामभिः स्थानैः सह । ॐ "वृद्धो यूना०" इति निपातनात् सहशब्दाभावेपि तृतीया ॐ । अन्तरिक्षलोकेन सह आप्रायि आपूरि तल्लोकद्वयं तमसा आपूरि । ॐ प्रा पूरणे । कर्मणि लुङि चिण् । आतो युगागमः ॐ । तथा बृहती महती सर्वत्र व्यापिनी सती दिवः द्युलोकस्य तृतीयस्य सदांसि । ॐ सीदन्त्यत्रेति अधिकरणे सदेः असुन् ॐ । स्थानानि वितिष्ठसे विशेषेण व्याप्नोषि । ॐ "समवप्रविभ्यः स्थः" इति तिष्ठतेरात्मनेपदम् ॐ । एवं लोकत्रयव्यापित्वेन त्वदीयेन त्वेषम् दीप्यमानं नीलवर्णं तमः अन्धकारः आ वर्तते सर्वम् आवृत्य तिष्ठति । अथ वा पृथिवीलोकाद् उत्थाय द्युलोकम् आवृणोति तस्माच्च पृथिवीम् इति तमःकेवल्यमेव वर्तते ॥

हे रात्रि ! तूने पृथिवीलोकके गिरि नदी पर्वत स्थल आदिमें, द्युलोकके स्थानोंमें और मध्यम लोक अन्तरिक्षमें अपने अंधकार को व्याप्त कर दिया है । इस प्रकार लोकत्रयव्यापी तेरा नीलवर्णका अंधकार सबको व्याप्त करके स्थित है । इस लिये पृथिवी पर अंधकार ही अंधकार है ॥ १ ॥

द्वितीया ॥

न यस्याः॑ पा॒रं द॒दृशे॒ न योयु॑व॒द् विश्व॑मस्यां॒ नि वि॑शते॒ यदेज॑ति ।

अरिष्टासस्त उर्वि तमस्वति रात्रि पारमशीमहि भद्रे पारमशीमहि ॥ २ ॥

न । यस्याः । पारम् । ददृशे । न । योयुवत् । विश्वम् । अस्याम् । नि । विशते । यत् । एजति ।

अरिष्टासः । ते । उर्वि । तमस्वति । रात्रि । पारम् । अशीमहि । भद्रे । पारम् । अशीमहि ॥ २ ॥

यस्या रात्रेः पारम् परतीरम् अन्तो न ददृशे न दृश्यते अस्याम् अनवच्छिन्नायां लोकत्रयव्यापिन्यां रात्र्यां विश्वम् चराचरात्मकं जगद् योयुवत् न विभजमानं विभक्तं नासीत् किं तु विश्वम् एकाकारमेवाभूत् । ❀ यौतेर्यङ्लुगन्तात् शतरि ङित्त्वाद् गुणाभावे उवङ् आदेशः । "अभ्यस्तानाम् आदिः" इति आद्युदात्तत्वम् ❀ । यज्जगत् एजति कम्पते । ❀ एजृ कम्पने । लटि व्यत्ययेन परस्मैपदम् ❀ । प्राणिजातं तद् अस्यां नि विशते इतस्ततो गन्तुम् असमर्थं सत् तत्रतत्रैव निविष्टं निद्राणं भवति । यद्वा । ❀ एजतेः शतृप्रत्ययः ❀ । एजमाने कम्पमाने इतस्ततः संचलति यत् । ❀ सप्तम्या लुक् ❀ । यस्मिन् तमसि नि विशते विभक्तत्वेन अपरिदृश्यमानं विश्वं तत्रतत्रैव संविशति । ❀ विश प्रवेशने । "नेर्विशः" इति आत्मनेपदम् ❀ । हे उर्वि प्रभूते । ❀ "वोतो गुणवचनात्" इति उरुशब्दाद् ङीष् ❀ । प्रभूते सर्वलोकव्यापिनि हे तमस्वति बहुलान्धकारवति । ❀ भूमार्थे मतुप् प्रत्ययः । "तसौ मत्वर्थे" इति भसंज्ञत्वात् पदसंज्ञानिबन्धनरुत्वाभावः ❀ । हे रात्रि ते तव पारम् परतीरम् अन्तम् अरिष्टासः अरिष्टाः । ❀ रिशतेर्हिंसार्थात् कर्मणि क्तप्रत्ययः ❀ । सर्पव्याघ्र-

चोरप्रभृतिभिरबाधिताः सन्तः वयम् अशीमहि प्राप्नुयाम। हे भद्रे भन्दनीये कल्याणरूपे श्रेयस्करि वा रात्रि पारम् अशीमहि पारम् अवधिम् अशीमहि आदरार्था पुनरुक्तिः। ❀ अश्नातेर्लुङि विकरणस्य लुक् ❀ ॥

जिस रात्रिका दूसरा पार नहीं दीखता, उस अनवच्छिन्न त्रिलोकव्यापिनी रात्रिमें चराचरात्मक जगत् विभक्त नहीं होता है, किंतु एकाकार ही होता है। जो जगत् चेष्टा करता है वह जगत् इस रात्रिमें इधर उधर चलनेको असमर्थ रहता हुआ वहाँ ही बैठ कर निद्रित होजाता है। हे सर्वलोकव्यापिनी प्रभूत अंधकार वाली रात्रि, हम सर्प व्याघ्र चोर आदिसे अहिंसित रहते हुए तेरे पारको प्राप्त होवें, हे कल्याणरूपे रात्रि! तेरे पारको हम प्राप्त होवें ॥ २ ॥

तृतीया ॥

ये ते रात्रि नृचक्षसो द्रष्टारो नवतिर्नव ।
अशीतिः सन्त्यष्टा उतो ते सप्त सप्ततिः ॥ ३ ॥

ये। ते। रात्रि। नृऽचक्षसः। द्रष्टारः। नवतिः। नव।
अशीतिः। सन्ति। अष्टौ, उतो इति। ते। सप्त। सप्ततिः ॥३॥

अत्र सार्धमन्त्रद्वयेन सर्वलोकव्यापिन्या रात्रेः प्रभावस्य द्रष्टारो गणदेवा उच्यन्ते। हे रात्रि ते तव संबन्धिनां महिम्नाम् इति शेषः। नृचक्षसः नृणां कर्मफलस्य द्रष्टारो नवोत्तरनवतिसंख्याका ये गणदेवा द्रष्टारो रात्रीप्रभावस्य आलोकयितारो ये सन्ति ये च अष्टोत्तराशीतिसंख्याका गणदेवा रात्र्या द्रष्टारः सन्ति। उतो अपि च सप्त सप्ततिः सप्तोत्तरसप्ततिसंख्याका ये गणदेवास्ते तव द्रष्टारः सन्ति। तेभिर्नः पाहि इत्युत्तरेण संबन्धः। ❀ अत्र नव-

त्यशीतिसप्तत्यादयः शब्दा नव दशतः परिमाणम् अस्येत्यर्थे नव-शब्दात् तिप्रत्ययः अष्टशब्दात् तिप्रत्ययः अशीभावश्च सप्तानां दशतां सप्तभावः तिप्रत्ययः इति व्युत्पादनीयाः । ते च "०विंश-तित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्" इति सू-त्रेण परिमाणार्थे निपातिताः ❀ ॥

[अब ढाई मन्त्रमें सर्वलोकव्यापिनी रात्रिके प्रभावके द्रष्टा गणदेवताओंका वर्णन किया है, कि–] हे रात्रि ! तुझसे संब-न्धित मनुष्योंके कर्मफलके द्रष्टा जो निन्यानवें गणदेव हैं ! और जो रात्रिके प्रभावके देखने वाले अट्ठासी गणदेवता हैं तथा हे रात्रि ! तेरे प्रभावको देखने वाले जो सतत्तर देवगण हैं, उनके द्वारा तुम हमारी रक्षा करो ॥ ३ ॥

चतुर्थी ॥

षष्टिश्च षट् च रेवति पञ्चाशत् पञ्च सुम्नयि ।
चत्वारश्चत्वारिंशच्च त्रयस्त्रिंशच्च वाजिनि ॥ ४ ॥

षष्टिः । च । षट् । च । रेवति । पञ्चाशत् । पञ्च । सुम्नयि ।
चत्वारः । चत्वारिंशत् । च । त्रयः । त्रिंशत् । च । वाजिनि ४

हे रेवति रयिमति । ❀ रयिशब्दाद् मतुपि "छन्दसीरः" इति मतुपो वत्वम् । "रयेर्मतौ बहुलम्" इति संप्रसारणम् । पूर्वरूपत्वे गुणः ❀ । हे धनवति धनप्रदे हे रात्रि षष्टिश्च षट् च षडुत्तरषष्टि-संख्याका ये गणदेवाः सन्ति । ❀ परस्परसमुच्चयार्थौ चका-रौ ❀ । हे सुम्नयि सुम्नं सुखं तद्वति तत्प्रापिके पञ्चाशत् पञ्च पञ्चोत्तरपञ्चाशत्संख्याका ये गणदेवा द्रष्टारः सन्ति । तथा चत्वा-रश्चत्वारिंशत् चतुरुत्तराश्चत्वारिंशत्संख्याकाश्च ये सन्ति । हे वाजिनि वाजः अन्नं तद्वति वेगो वा वाजः तद्युक्ते त्रयस्त्रिंशत् त्र्यु-

त्वारिंशत्संख्याका ये तव द्रष्टारो गणदेवा सन्ति। तेभिर्नः पाहि इत्युत्तरेण संबन्धः। ❀ षण्णां दशतां षड्भावः तिश्च प्रत्ययः। अपदत्वं च षड् दशतः परिमाणम् अस्य षष्टिः। पञ्चानां दशतां पञ्चभावः आशच्च प्रत्ययः। चत्वारः। "चतुरनडुहोराम् उदात्तः" इति आम् आगमः। चतुर्णां दशतां चत्वारिन्भावः शच्च प्रत्ययः। त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः। त्रयो: दशतः परिमाणम् अस्य त्रिंशत्। एवं परिमाणार्थे पूर्वसूत्रेण षष्ट्यादिशब्दा निपातिताः ❀ ॥

हे धन प्रदान करने वाली रात्रि! जो आपके छियासठ देवगण हैं। हे सुख प्रदान करने वाली रात्रि! आपके जो पचपन देवगण हैं, हे अन्न प्रदान करने वाली रात्रि! आपके जो चौवालीस देवगण हैं उनके द्वारा आप हमारी रक्षा करिये ४

पञ्चमी ॥

द्वौ च॑ ते विंश॒तिश्च॑ ते॒ रात्र्येका॑दशाव॒माः ।
तेभि॑र्नो अ॒द्य पा॒युभि॒र्नु पा॑हि दुहितर्दिवः ॥ ५ ॥

द्वौ। च॒। ते॒। विंश॒तिः। च॒। ते॒। रात्रि॑। एका॑दश। अ॒व॒माः।
तेभिः। न॒ः। अ॒द्य। पा॒यु॒ऽभिः। नु। पा॒हि॒। दु॒हि॒तः। दि॒वः॥५

हे रात्रि विभावरि ते तव द्वौ विंशतिः अधिकविंशतिसंख्याका ये गणदेवा द्रष्टारः सन्ति। परस्परसमुच्चयार्थौ चकारौ। ❀ द्वयोर्दशतोर्विन्भावः शतिश्च प्रत्ययः। द्वौ दशतौ परिमाणम् अस्य विंशतिः। अत्र नवत्यादयो विंशतिपर्यन्ताः शब्दाः संख्येयवचनाः ❀। तथा अवमाः संख्यातो निकृष्टा न्यूना एकादश एकश्च दश च एकोत्तरदशसंख्याका ये गणदेवास्त्वदीयप्र्यासिद्रष्टारः सन्ति। ❀ एकश्च दश चेति द्वन्द्वे "संख्या" इति पूर्वपदप्रकृतिस्वर-

त्वम् ❀ । हे दिवो दुहितः द्युलोकस्य पुत्रि । आलोकाभावे रात्रिः आकाशाद् आपतन्तीव दृश्यते अतो रात्रिर्द्युलोकस्य पुत्रीत्यभिधीयते । ❀ "परमपि च्छन्दसि" इति षष्ठ्यन्तस्य आमन्त्रिताङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य सर्वानुदात्तत्वम् ❀ । एवंविधे हे रात्रि त्वम् अद्य इदानीं नु क्षिप्रं तेभिः पूर्वमन्त्रोक्तैर्नवनवत्यादिभिः एकादशान्तैस्त्वदीयव्याप्तिदर्शकैः पायुभिः रक्षकैः । ❀ कृवापाजिमि० [उ० १. १] इति पातेः उण् प्रत्ययः ❀ । गणदेवैर्नः अस्मान् पाहि रक्ष ॥

और हे रात्रि ! तेरे जो बाईस देवगण हैं और और हे रात्रि ! तेरी व्याप्तिको देखने वाले तेरे जो न्यूनसे न्यून ग्यारह देवगण हैं हे द्युलोककी पुत्री ! (आलोकके अभाववश रात्रि आकाश से पतित होती हुई सी दीखती है अत एव रात्रिको द्युलोककी पुत्री कहा है ।) हे रात्रि ! तू इस समय निन्यानवेसे लेकर ग्यारह तकके अपनी व्याप्तिके दर्शक रक्षकोंके द्वारा हमारी रक्षा कर ॥ ५ ॥

रक्षा माकिर्नो अघशंस ईशत मा नो दुःशंस ईशत ।
मा नो अद्य गवां स्तेनो मावीनां वृक ईशत ॥ ६ ॥
माश्वानां भद्रे तस्करो मा नृणां यातुधान्यः ।
परमेभिः पथिभिः स्तेनो धावतु तस्करः ।
परेण दत्वती रज्जुः परेणाघायुरर्षतु ॥ ७ ॥

रक्ष । माकिः । नः । अघऽशंसः । ईशत । मा । नः । दुःऽशंसः । ईशत
मा । नः । अद्य । गवाम् । स्तेनः । मा । अवीनाम् । वृकः । ईशत ६

मा । अश्वानाम् । भद्रे । तस्करः । मा । नृणाम् । यातुऽधान्यः ।

परमेभिः । पथिऽभिः । स्तेनः । धावतु । तस्करः ।

परेण । दत्वती । रज्जुः । परेण । अघऽयुः । अर्षतु ॥ ७ ॥

षष्ठी ॥ द्विपदेयम् ऋक् । हे रात्रि रक्ष पालय नः अस्मान् । रक्षणं नाम परकृतबाधापरिहारः । तद् आह । अघशंसः अघं पापं हिंसालक्षणं तत् शंसति कथयतीति अघशंसः त्वाम् अहं हन्मि इत्येवंवादी । अघेन पापेन क्रूरेण शस्त्रादिना शंसति हिनस्तीति वा अघशंसः । ❀ शस हिंसायाम् इति धातुः ❀ । एतादृशो माकिः न कश्चनापि नः अस्माकम् ईशत मा ईष्टाम् । ❀ माकिरिति निपातसमुदायः । तत्र मा इति निपातः क्रियापदेन संबध्यते । किशब्दः कश्चनेत्यर्थं कथयन् अघशंसेन संबध्यते ❀ । हिंसकः कश्चनापि अस्मान् बाधितुम् ईश्वरः समर्थो मा भवत्वित्यर्थः । ❀ ईश ऐश्वर्ये । अस्मात् "स्मोत्तरे लङ् च" इति स्मोत्तरत्वाभावेपि माङि उपपदे लङ् । "बहुलं छन्दसि" इति शपो लुगभावः ❀ । तथा दुःशंसः दुष्टं दुर्वचनस्य कथयिता दुष्टं वा हिंसिता शत्रुः नः अस्माकं मा ईशतेति पूर्ववद् योज्यम् ॥

सप्तमी ॥ हे रात्रे स्तेनः चोरः अद्य इदानीं नः अस्मदीयानां गवाम् । मा ईशतेति क्रियानुषङ्गः । गवापहर्ता मा भवतु । वृकः वृकति आदत्त इति वृकः आरण्यश्वा । ❀ इगुपधलक्षणः कप्रत्ययः ❀ । अवीनाम् अविजातीयानां पशूनां मा ईशत बलाद् अपहर्तुं शक्तो मा भवतु । हे भद्रे भन्दनीये रात्रि तस्करः तत् प्रसिद्धम् अनर्थजातं करोतीति तस्करश्चोरः । ❀ "तद्बृहतोः करपत्योः०" इति चोरेभिधेये तच्छब्दस्य सुडागमः तशब्दलोपश्च ❀ । अश्वानाम् अस्मदीयानां तुरंगमाणाम् । मा ईशतेत्यनुषङ्गः । तथा

नृणानां नेतृणां कर्मसु व्याम्रियमाणानां पुत्रभृत्यादीनाम् । ❀ "नृ च" इति दीर्घस्य विकल्पितत्वाद् अत्र दीर्घाभावः ❀ । यातुधानाः यातवो यातनाः पीडा धीयन्ते विधीयन्ते जनानाम् एभिः । ❀ इति करणे ल्युट् ❀ । यातूनां धातारो वा । ❀ "कृत्यल्युटो बहुलम्" इति कर्तरि ल्युट् ❀ । ईदृशाः पिशाचादयो मा ईशत नृणां बाधका मा भवन्तु ॥

अष्टमी ॥ स्तेनतस्करयोरेको यौगिकः । तद् धनापहरणादिकं करोतीति तस्करः तादृशस्तेनश्चोरः परमेभिः अतिदूरैः पथिभिः मार्गैः साधनैर्धावतु शीघ्रं गच्छतु पलायताम् । त्वदीयोपस्थानबलाद् अस्मदभिमुखश्चोरो व्याकुलः सन् अतिदूरं देशं गच्छतु । ❀ सर्तेर्वेगितायां गतौ धावादेशः ❀ । तथा दत्वती दन्तवती । ❀ "छन्दसि च" इति दन्तशब्दस्य दद्भावः । "झयः" इति मतुपो वत्वम् ❀ । रज्जुः रज्जुवद् आयतः सर्पादिः परेण अतिदूरेण मार्गेण धावतु । तथा अघायुः अघं पापं हिंसालक्षणं परस्य इच्छतीति अघायुः । ❀ "छन्दसि परेच्छायामपि" इति क्यच् । "अश्वाघस्यात्" इति आत्त्वम् "क्याच्छन्दसि" इति उप्रत्ययः ❀ । एवंविधो बाधकः परेण दूरेण अर्षतु गच्छतु । ❀ ऋषी गतौ । भौवादिकः ❀ ॥

हे रात्रि ! हमारी रक्षा कर ! [दूसरोंकी दी हुई बाधासे हमको बचा] मैं तुझको मार डालूँगा–इस प्रकार जो पाप भरे वचनको बोले ऐसा कोई भी मेरे ऊपर आरूढ़ न होसके अर्थात् कोई भी हिंसक मुझे पीड़ा देनेमें समर्थ न होवे। तथा दुर्वचनको कहने वाला कोई भी शत्रु मुझ पर अपनी प्रभुता न जमा सके। हे रात्रे ! चोर हमारी गौओंका हरण करनेमें समर्थ न होवे। और भेड़िया हमारी भेड़ोंको बलपूर्वक ले जानेमें समर्थ न होवे। हे कल्याणि रात्रि ! चोर हमारे घोड़ोंको ले जानेमें समर्थ न

होवे। और हमारे पुत्र भृत्य आदि मनुष्यों पर यातुधानी और पिशाच आदि बाधक न होसकें॥ वह धनापहरण आदिको करने वाला तस्कर चोर परम दूरके मार्गोंसे होता हुआ भाग जावे। आपके उपस्थानके बलसे हमारे अभिमुख आता हुआ चोर व्याकुल होकर दूरको भाग जावें। तथा दाँत वाली रज्जु सर्प आदि दूरके मार्गको भाग जावे और हिंसारूपी पापको चाहने वाला अघायु दूर भाग जावे॥ ६॥ ७॥

नवमी॥

अध॑ रात्रि तृ॒ष्टधू॑ममशी॒र्षाण॒महिं॑ कृणु।
हनू॒ वृक॑स्य ज॒म्भया॒स्तेन॒ तं द्रु॑प॒दे ज॑हि॥ ८॥

अध। रात्रि। तृष्टऽधूमम्। अशीर्षाणम्। अहिम्। कृणु।
हनू इति। वृकस्य। जम्भयाः। तेन। तम्। द्रुऽपदे। जहि॥८॥

अध अथ। अपि चेत्यर्थः। हे रात्रि तृष्टधूमम्। ❀ ञितृष पिपासायाम्। अस्माद् "गत्यर्थाकर्मक०" इति कर्तरि क्तः। अत्र पिपासार्थेन तृषिणा तज्जन्या आर्तिर्विवक्ष्यते ❀। आर्तिकारी धूमः विषज्वालाधूमः निश्वासधूमो वा यस्य तं परोपद्रवकारिविषज्वालापरिवृतम् अहिम् सर्पम् अशीर्षाणम् अशिरस्कं कृणु कुरु। विपरीतम् अहेः शिरश्छिन्द्धीत्यर्थः। ❀ "शीर्षश्छन्दसि" इति शिरसः शीर्षभावः ❀॥ किं च वृकस्य अजादिप्रभृतीनाम् अपहर्तुः आरण्यशुनो हनू मुखस्य अन्तः स्थूलदन्तयुक्तौ पार्श्वौ पश्वादानसाधनभूतौ जम्भयाः जम्भयेः। ❀ जम्भि हिंसाकर्मा। जभिजृभी गात्रविनामे। अस्माल्लेटि आडागमः ❀। तेन यतो हनू निर्मर्दितौ तेन कारणेन तं निष्पिष्टहनुकं वृकं द्रुपदे द्रुद्रुमः तस्य पदे स्थाने जहि घातय। द्रुपदे इति रात्रेर्विशेषणं

वा । द्रुः सर्वतोभिद्रवणम् अभिद्रवणसाधनपादयुक्ते सर्वतो व्यापिनि रात्रि तं जहीति । ❀ हन्तेर्लोटि "हन्तेर्जः" इति जादेशे "असिद्धवद् अत्रा भात्" इति जादेशस्य असिद्धत्वात् हेर्लुक् न भवति ❀ ॥

हे रात्रि ! जिसका श्वासरूपी धुआँ पीड़ा देने वाला है उस सर्पको तुम शिररहित करो और भेड़ बकरी आदिका अपहरण करने वाले भेड़ियेके जो पशुओंको पकड़नेके स्थूल दाँतों वाले पार्श्व (हनू) हैं उनको भी नष्ट कर डालो । उसके हनूको नष्ट करनेके अनन्तर उस भेड़ियेको पेड़के नीचे समाप्त करदो ॥८॥

दशमी ॥

त्वयिं रात्रि वसामसि स्वपिष्यामसि जागृहि ।
गोभ्यों नः शर्म यच्छाश्वेभ्यः पुरुषेभ्यः ॥ ९ ॥

त्वयि । रात्रि । वसामसि । स्वपिष्यामसि । जागृहि ।
गोभ्यः । नः । शर्म । यच्छ । अश्वेभ्यः । पुरुषेभ्यः ॥ ९ ॥

हे रात्रि त्वयि । देवताभिप्रायेण अधिकरणत्वं त्वत्कृतरक्षणनिमित्ते वा । वसामसि वसामः । एकत्र निवसामः । न केवलं निवासमात्रं किं तु स्वपिष्यामसि स्वप्स्यामः । निद्रां करिष्यामः । ❀ उभयत्र "इदन्तो मसिः" । स्वपेर्व्यत्ययेन इडागमः ❀ । पुत्रमित्राद्यपेक्षया बहुवचनम् । यद्वा त्वयि अस्मदीयं सर्वं भारं निधायेति शेषः । वसामः स्वप्स्यामश्च । त्वं तु जागृहि । अस्मान् रक्षितुम् अवहिता भव । ❀ जागृ निद्राक्षये । अदादिकः ❀ ॥ न केवलम् अस्मद्रक्षणे जागरिता किं तु नः अस्माकं गोभ्यः गोष्ठे निवसद्भ्यः अश्वेभ्यः पुरुषेभ्यश्च गृहे निवसद्भ्यः शर्म सुखं यच्छ । यथा निद्राणास्ते तव पारं क्षेमेण प्राप्नुयुस्तथा कुर्वित्यर्थः ॥

इति षष्ठेनुवाके द्वितीयं सूक्तम् ॥